# Trailokyavijayam Nama Varma Kavacham

# ત્રૈલોક્યવિજયં નામ વર્મકવચમ્

## Document Information

Text title : Trailokyavijayam Nama Varma Kavacham

File name : trailokyavijayaMnAmavarmakavacham.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 457/11-53||

Latest update : January 13, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 13, 2026

*sanskritdocuments.org*

# ત્રૈલોક્યવિજયં નામ વર્મકવચમ્

(શ્રીકૃષ્ણસ્તોત્રમ્)

નનામ મૂર્ધ્ના શમ્ભું સ વૃત્તાન્તં સમુવાચ તમ્ ।
પ્રસન્નઃ શઙ્કરસ્તસ્મૈ દદૌ શ્રીકૃષ્ણસન્મનુમ્ ॥ ૧૧॥

ત્રૈલોક્યવિજયં વર્મ તથા સ્તોત્રં હરેઃ શુભમ્ ।
ત્રૈલોક્યવિજયસ્યાઽસ્ય કવચસ્ય પ્રજાપતિઃ ॥ ૧૨॥

ઋષિશ્છન્દશ્ચ ગાયત્રી દેવો રાસેશ્વરઃ પ્રભુઃ ।
ત્રૈલોક્યવિજયપ્રાપ્તૌ વિનિયોગઃ સદા મતઃ ॥ ૧૩॥

પ્રણવો મે શિરઃ પાતુ શ્રીકૃષ્ણાય નમઃ સદા ।
પાયાત્કપાલં "કૃષ્ણાય સ્વાહા" પઞ્ચાક્ષરાત્મકઃ ॥ ૧૪॥

કૃષ્ણેતિ પાતુ નેત્રે ચ કૃષ્ણઃ સ્વાહેતિ તારકમ્ ।
હરયે નમ ઇત્યેવં ભ્રૂલતાં પાતુ મે સદા ॥ ૧૫॥

ૐ ગોવિન્દાય સ્વાહેતિ નાસિકાં પાતુ સર્વદા ।
ગોપાલાય નમો ગણ્ડૌ પાતુ મે સર્વતઃ પ્રભો ॥ ૧૬॥

ૐ નમો ગોપાઙ્ગનેશાય કર્ણૌ પાતુ સદા મમ ।
ૐ કૃષ્ણાય નમઃ શશ્વત્પાતુ મેઽધરયુગ્મકમ્ ॥ ૧૭॥

ૐ ગોવિન્દાય સ્વાહેતિ દન્તૌઘં મે સદાઽવતુ ।
પાતુ કૃષ્ણાય દન્તાઽધો દન્તોર્ધ્વં ક્લીં સદાઽવતુ ॥ ૧૮॥

ૐ શ્રીકૃષ્ણાય સ્વાહેતિ જિહ્વિકાં પાતુ મે સદા ।
રાસેશ્વરાય સ્વાહેતિ તાલુકં પાતુ મે સદા ॥ ૧૯॥

રાધિકેશાય સ્વાહેતિ કણ્ઠં પાતુ સદા મમ ।
નમો ગોપાઙ્ગનેશાય વક્ષઃ પાતુ સદા મમ ॥ ૨૦॥

ૐ ગોપેશાય સ્વાહેતિ સ્કન્ધં પાતુ સદા મમ ।

નમઃ કિશોરવેશાય સ્વાહા પૃષ્ઠં સદાઽવતુ ॥ ૨૧॥

ઉદરં પાતુ મે નિત્યં મુકુન્દાય નમઃ સદા ।
ઔં હ્રીં ક્લીં કૃષ્ણાય સ્વાહા કરૌ પાતુ સદા મમ ॥ ૨૨॥

ૐ વિષ્ણવે નમો બાહુયુગ્મં પાતુ સદા મમ ।
ૐ હ્રીં ભગવતે સ્વાહા નખરં પાતુ મે સદા ॥ ૨૩॥

ૐ નમો નારાયણાય નખરન્ધ્રં સદાઽવતુ ।
ઔં હ્રીં હ્રીં પદ્મનાભાય નાભિં પાતુ સદા મમ ॥ ૨૪॥

ૐ સર્વેશાય સ્વાહેતિ કપાલં પાતુ મે સદા ।
ૐ ગોપીરમણાય સ્વાહા નિતમ્બં પાતુ મે સદા ॥ ૨૫॥

ૐ ગોપીરમણનાથાય પાદૌ સદાઽવતુ મમ ।
ૐ હીં ક્લીં રસિકેશાય સ્વાહા સર્વં સદાઽવતુ ॥ ૨૬॥

ૐ કેશવાય સ્વાહેતિ મમ કેશાન્ સદાઽવતુ ।
નમઃ કૃષ્ણાય સ્વાહેતિ બ્રહ્મરન્ધ્રં સદાઽવતુ ॥ ૨૭॥

ૐ માધવાય સ્વાહેતિ મે લોમાનિ સદાઽવતુ ।
ૐ હ્રીં શ્રીં રાધિકેશાય સ્વાહા સર્વં સદાઽવતુ ॥ ૨૮॥

પરિપૂર્ણતમઃ કૃષ્ણઃ પ્રાચ્યાં માં સર્વદાઽવતુ ।
સ્વયં ગોલોકનાથો મામાગ્નેય્યાં દિશિ રક્ષતુ ॥ ૨૯॥

પૂર્ણબ્રહ્મસ્વરૂપશ્ચ દક્ષિણે માં સદાઽવતુ ।
નૈરૃત્યાં પાતુ માં કૃષ્ણઃ પ્રતીચ્યાં પાતુ માં હરિઃ ॥ ૩૦॥

ગોવિન્દઃ પાતુ માં શશ્વદ્વાયવ્યાં દિશિ નિત્યશઃ ।
ઉત્તરે માં સદા પાતુ રસિકાનાં શિરોમણિઃ ॥ ૩૧॥

ઐશાન્યાં માં સદા પાતુ વૃન્દાવનવિહારકૃત્ ।
વૃન્દાવનીપ્રાણનાથઃ પાતુ મામૂર્ધ્વદેશતઃ ॥ ૩૨॥

સદૈવ માધવઃ પાતુ બલિહારી બલાધિકઃ ।
જલે સ્થલે ચાન્તરિક્ષે નૃસિંહઃ પાતુ માં સદા ॥ ૩૩॥

સ્વપ્ને જાગરણે શશ્વત્પાતુ માં માધવઃ સદા ।
સર્વાત્મા શ્રીકૃષ્ણનારાયણો માં પાતુ સર્વતઃ ॥ ૩૪॥

ઇતિ ત્રૈલોક્યવિજયં વર્મોક્તં તે મહાઽદ્ભુતમ્ ।
કણ્ઠે વા દક્ષિણે બાહૌ ધારણાદ્વિજયઃ સદા ॥ ૩૫॥

સ ભવેત્ સિદ્ધકવચો દશલક્ષં જપેત્તુ યઃ ।
દશાંશહોમઃ કર્તવ્યો યથેષ્ટસિદ્ધિમિચ્છતા ॥ ૩૬॥

ૐ શ્રીં નમઃ શ્રીકૃષ્ણાય પરિપૂર્ણતમાય સ્વાહા ।
સિદ્ધઃ સ્યાત્ પઞ્ચલક્ષૈસ્તુ મન્ત્રઃ સપ્તદશાક્ષરઃ ॥ ૩૭॥

અથ સ્તોત્રં શ‍ૃણુ દિવ્યં સદ્યસ્તુષ્ટિકરં પરમ્ ।
દિવ્યં શ્રીશ્રીકૃષ્ણનારાયણસ્ય વેધસોદિતમ્ ॥ ૩૮॥

સૂક્ષ્મતમં ચાક્ષરેશં નિર્ગુણં સગુણં હરિમ્ ।
નિરાકારં ચ સાકારં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૩૯॥

સર્વાધારં સ્વતન્ત્રં ચ કમનીયં વિભું હરિમ્ ।
સાક્ષિણં કર્મફલદં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૦॥

જગજ્જન્માદિકર્તારં સચ્ચિદાનન્દમર્થગમ્ ।
સ્ત્રીપુન્નપુંસકાત્માનં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૧॥

તારકં ધારકં સર્વકારણાનાં તુ કારણમ્ ।
બીજં વિપ્રં રવિં ચન્દ્રં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૨॥

શઙ્કરં શેષરૂપં ચ બ્રહ્માણં કપિલં મુનિમ્ ।
સનત્કુમારં રાધેશં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૩॥

વિષ્ણું દેવીં મનું ભક્તં વસન્તં માર્ગશીર્ષકમ્ ।
એકાદશીં સાગરં ચ શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૪॥

હિમાલયં ક્ષિતિં વૃન્દાં ચન્દનં કલ્પપાદપમ્ ।
ધાન્યં ચ પારિજાતં ચ શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૫॥

ઐરાવતં વૈનતેયં કામધેનું તથામૃતમ્ ।
સુવર્ણં ચ યવં સિંહં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૬॥

બૃહસ્પતિં કુબેરં ચ વેદમિન્દ્રં સરસ્વતીમ્ ।
અકારં જાહ્નવીં મનઃ શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૭॥

સુદર્શનં બ્રહ્મતેજઃ કાન્તં કાલં બલં ગુરુમ્ ।
માતરં વિશ્વકર્માણં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૮૮॥

પતિવ્રતાં પિતરં ચ શાલગ્રામં સુતં નૃપમ્ ।
સામવેદં વૃષં શૈત્યં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૪૯॥

ગન્ધં શબ્દં રાજસૂયં ગાયત્રીં પાવકં પયઃ ।
સુચિત્રસ્થં સ્તુતિં દર્ભં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૫૦॥

શાન્તિં વિભું મતિં ચિત્રં શ્યામલં ગોપિકાપતિમ્ ।
દિવ્યભૂષાધરં કાન્તં શ્રીકૃષ્ણં પ્રણમામ્યહમ્ ॥ ૫૧॥

વિહારિણં ચ રસિકં રાધાકાન્તં મનોહરમ્ ।
લક્ષ્મીશં શ્રીકૃષ્ણનારાયણં નિત્યં નમામ્યહમ્ ॥ ૫૨॥

ઇતિ સ્તોત્રેણ ત્રૈલોક્યે સર્વદા વિજયો ભવેત્ ।
ગચ્છ સાધય સદ્ગુરુ પ્રતિજ્ઞાન્તં જયસ્તવ ॥ ૫૩॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને
૪૫૭-અધ્યાયાન્તર્ગતં શિવેન બ્રહ્મણે પ્રોક્તં ત્રૈલોક્યવિજયં નામ
વર્મ (કવચમ્)તથા શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૪૫૭/૧૧-૫૩॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 457/11-53..

Proofread by PSA Easwaran

*Trailokyavijayam Nama Varma Kavacham*

pdf was typeset on January 13, 2026

Please send corrections to *sanskrit@cheerful.com*